भारतमञ्जरी/मौसलंपर्व

< भारतमञ्जरी

मौसलं पर्व

नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ।

देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥ १६.१ ॥

महीं महीभृतां धुर्ये धर्मराजे प्रशासति ।

षड्विंशेऽब्दे महाभागा द्वारकां मुनयो ययुः ॥ १६.२ ॥

तान्दृष्ट्वा कौशिकमुखान्प्रहर्षन्मदविप्लुताः ।

साम्बं कृत्वा वधूवेशं पप्रच्छुर्वृष्णिपुंगवाः ॥ १६.३ ॥

अपि पुत्रः सुता वास्या भविष्यति मुनीश्वराः ।

तच्छ्रुत्वा तेऽवदन्नस्याः कुलमृत्युर्भविष्यति ॥ १६.४ ॥

मुसलं ब्रह्मदण्डाख्यमित्युक्त्वादर्शनं ययुः ।

लौहं साम्बस्ततोऽसूत मुसलं वज्रसंहतम् ॥ १६.५ ॥

तदाहुको भयात्पिष्ट्वा तूर्णं तत्याज सागरे ।

सर्वज्ञो ज्ञातवृत्तान्तो वृष्णिक्षयमुपस्थितम् ॥ १६.६ ॥

विज्ञाय कैटभारातिस्तीर्थयात्रारसाद्ययौ ।

चण्डांशुमण्डलोच्चण्डं ततश्चक्रं सुरद्विषः ॥ १६.७ ॥

रथो ध्वजश्च सौवर्णः सहसान्तरधीयत ।

अथ मार्जारविच्छाये कबन्धावृतमण्डले ॥ १६.८ ॥

सूर्ये विघट्टिताशेषदिक्तटे वाति मारुते ।

मुण्डो विटङ्कवदनो यादवानां गृहे गृहे ॥ १६.९ ॥

संदर्श्य वदनं प्रायाद्वाचान्विष्टोऽप्यदृश्यत ।

चीत्कारपुरुषः शब्दः शारिकानां गृहेष्वभूत् ॥ १६.१० ॥

गृध्रगोमायुनादेन राजमार्गोऽप्यपूर्यत ।

विपरीता प्रसूतिश्च पशूनामभवत्तदा ॥ १६.११ ॥

कोशेषु कनकाबन्धे रत्नानि स्वयमस्फुटन् ।

तेषु घोरनिमित्तेषु जातेष्वप्यविशङ्किताः ॥ १६.१२ ॥

बभूवुर्वृष्णयो भान्ति न हि नाशेषु बुद्धयः ।

प्रभासमथ संप्राप्ते कृष्णे यादववृष्णयः ॥ १६.१३ ॥

तमेव देशमभ्येत्य चक्रिरे विपुलोत्सवम् ।

उद्यानेषु विचित्रेषु विजह्रुस्तत्र ते सुखम् ॥ १६.१४ ॥

गीतनृत्यरसासक्ताः कलिताः कालचक्षुषा ।

आपानकेलिसंसक्ते ततो वृष्णिकुलेऽभवत् ॥ १६.१५ ॥

विवादे युद्धसंबद्धः शैनेयकृतवर्मणोः ।

हार्दिक्यं सात्याकिः प्राह सुप्तहा सौप्तिको भवान् ॥ १६.१६ ॥

स तमूचे त्वया प्रायगतो भूरिश्रवा हतः ।

एवं विवादात्संग्रामस्तेषामासीत्सुदारुणः ॥ १६.१७ ॥

प्राक्तस्माद्वज्रमुसलात्प्रजातैर्वल्लरीचयैः ।

तृणमप्यभवत्तत्र ब्रह्मदण्डमदोत्कटम् ॥ १६.१८ ॥

क्षयाय मुसलीभूतं सहसान्धकवृष्णिषु ।

या भूदापानभूस्तेषां ललनानयनोत्सवः ॥ १६.१९ ॥

सैव मृत्योरभूद्घोरसंहाराहारमण्डपः ।

साम्बे गदे चारुदोष्णि प्रद्युम्ने कृतवर्मणि ॥ १६.२० ॥

अनिरुद्धे च शैनेये निहते पश्यतो हरेः ।

वृत्ते वृष्णिक्षये घोरे स्त्रीशेषा यादवे कुले ॥ १६.२१ ॥

द्वारका प्ररुरोदेव च्छिन्नहाराश्रुनिर्झरैः ।

ततः शौरिर्हलधरं द्रष्टुं दुःखाकुलो व्रजन् ॥ १६.२२ ॥

दारुकं तत्कथयितुं प्राहिणोत्सव्यसाचिने ।

योषितां दस्तुरक्षायै बभ्रुमादाय केशवः ॥ १६.२३ ॥

गत्वा जनकमामन्त्र्य रौहिणेयमुपाययौ ।

अथापश्यन्मुखात्तस्य निःसृतं मधुसूदनः ॥ १६.२४ ॥

सहस्रशीर्षं भुजगं श्वेतं श्वेताचलोपमम् ।

वासुकिप्रमुखैर्नागैरथ प्रत्युद्यतैः सह ॥ १६.२५ ॥

दृष्ट्वार्णवं प्रविष्टं तं वरुणेनार्चितं पुनः ।

गतिज्ञः सर्वभूतानां न शुशोच जनार्दनः ॥ १६.२६ ॥

भवे ह्यभावसद्भावे भावानां स्थिरता कुतः ।

अनन्तधाम्नि मिलिते बलभद्रे सकानने ॥ १६.२७ ॥

प्रविश्य योगी सुष्वाप निबद्धप्राणधारणः ।

तं स्वज्योतिषि संसक्तं लुब्धको मृगशङ्कया ॥ १६.२८ ॥

जघान निशिताग्रेण शरेण चरणोदरे ।

कृष्णशारधिया कृष्णो लुब्धकेनेषुणा हतः ॥ १६.२९ ॥

नारायणाख्यमविशत्परं धाम सनातनम् ।

सुरसिद्धर्षिगन्धर्वैः पूज्यमाने सह श्रिया ॥ १६.३० ॥

विष्णुं प्रविष्टे गोविन्दे बभूव क्षुभितं जगत् ।

अत्रान्तरे दारुकेन कथिते यादवक्षये ॥ १६.३१ ॥

शोकं त्रासं च दैन्यं च भेजिरे पाण्डवाः परम् ।

ततो युधिष्ठिरगिरा द्वारकां श्वेतवाहनः ॥ १६.३२ ॥

दारुकेनैव सहितः प्रययौ शोकमूर्च्छितः ।

स प्राप यादवपुरीमपद्मामिव पद्मिनीम् ॥ १६.३३ ॥

वृष्णिसिंहैर्विरहिता गुहां हैमवतीमिव ।

कष्टैररिष्टनिचयैः स्पृष्टां दुःखाद्विलोक्य ताम् ॥ १६.३४ ॥

द्रष्टुं विवेश शोकार्तं जनकं कंसविद्विषः ।

तारप्रलापमुखरैर्वृतं वृष्णिवधूजनैः ॥ १६.३५ ॥

षोडशस्त्रीसहस्राणि कलत्रं कमलापतेः ।

सौभद्रजनको दृष्ट्वा मुमोह भयविह्वलम् ॥ १६.३६ ॥

शयानं भुवि पार्थोऽपि वसुदेवं प्रलापिनम् ।

विलोक्य शोकविवशो वज्रभिन्न इवापतत् ॥ १६.३७ ॥

क्व रामः क्व च गोविन्दः क्व प्रद्युम्नः क्व सात्यकिः ।

अहो विधेर्दुरन्तेयं शक्तिरित्यर्जुनोऽवदत् ॥ १६.३८ ॥

मणिकङ्कणझाङ्कारिनृत्तगीतघनध्वनिः ।

अविश्रान्तमभूद्यत्र श्रवणानन्दनिर्झरैः ॥ १६.३९ ॥

तत्रैव वृष्णिनारीणां शृण्वन्नारोदनध्वनिम् ।

निशां निनाय बीभत्सुर्निरपायमयीं श्रियम् ॥ १६.४० ॥

ततः प्रातः प्रियसुतो वसुदेवः प्रियां तनुम् ।

तत्याज देवकीमुख्यैरनुयातो वधूजनैः ॥ १६.४१ ॥

ततः सात्त्वतमुख्यानां सर्वेषां शोकविह्वलः ।

पार्थः शरीरं संस्कृत्य चकार सलिलक्रियाम् ॥ १६.४२ ॥

वज्राभिधानं कृष्णस्य पौत्रं कुन्तीसुतस्ततः ।

आदाय वृष्णिकान्ताश्च प्रतस्थे दारुकानुगः ॥ १६.४३ ॥

अथ द्वारवतीं स्फारतरङ्गभुजमण्डलैः ।

शङ्खाट्टहासविकटो जहार मकराकरः ॥ १६.४४ ॥

हते वृष्णिपुरे क्षिप्रं रत्नलोभादिवाब्धिना ।

पुरुषानुगतं सर्वमित्यूचे दुःखितो जनः ॥ १६.४५ ॥

कलत्रं वृष्णिसिंहानामादाय श्वेतवाहनः ।

इन्द्रप्रस्थं व्रजन्प्राप दुर्गमां विकटाटवीम् ॥ १६.४६ ॥

दस्यवस्तत्र गोपाला बलिनः पशुजीविनः ।

अदृष्टपूर्वाः स्वर्योषित्सुभगाः सात्त्वताङ्गनाः ॥ १६.४७ ॥

तडित्तरलरत्नांशुपुञ्जरिताम्बराः ।

विलोक्य लोभवशगा हर्तुमभ्युद्ययुर्बलात् ॥ १६.४८ ॥

गोपानापतितान्दृष्टा तानुग्रलगुडायुधान् ।

गाण्डीवधन्वा गाण्डीपमधिज्यमकरोत्क्रुधा ॥ १६.४९ ॥

कालशक्तिहतस्यापि तस्यापि क्षपितद्विषः ।

न शक्तिरभवत्काचित्क्षीणेषोर्ज्याविकर्षणे ॥ १६.५० ॥

चापयष्टिरनायत्ता तस्याभूदतिदुःखगा ।

वृद्धस्येव दरिद्रस्य तरुणी रूपिणी वधूः ॥ १६.५१ ॥

तस्य कोपाग्नितप्तस्य वृथा भ्रूभङ्गकारिणः ।

भृत्या इवाविनीतस्य बभूवुरवशाः शराः ॥ १६.५२ ॥

ते दिव्यास्त्रगणाः क्वापि जग्मुरुत्सृज्य तं मृधे ।

गुणसङ्गामनादृत्य धूर्ता मित्रमिवाधनम् ॥ १६.५३ ॥

स निःशश्वास विपुलैर्मार्गणैः परिवर्जितः ।

क्षीणकोश इव त्यागी वैलक्ष्यविनताननः ॥ १६.५४ ॥

ततो निष्प्रतिभे तत्र पार्थे सर्वायुधक्षयात् ।

वृष्णिपौराङ्गना जह्रुर्निर्विवेका वनेचराः ॥ १६.५५ ॥

न तु प्रधाननारीषु तेषामासीत्प्रगल्भता ।

अनर्हस्य महार्हेषु नीचस्योजस्विता कथम् ॥ १६.५६ ॥

तैः प्रसह्य हृते स्त्रैणे भग्नमानो धनंजयः ।

प्रतस्थे निजदोर्दण्डे सासूयाः पातयन्दृशः ॥ १६.५७ ॥

अहो बलवती देवी संसारेऽस्मिन्ननित्यता ।

अहो निःसारपर्यन्ता भावानां प्रभविष्णुता ॥ १६.५८ ॥

अहो सर्वकषः कालश्चित्रपाकमहो जगत् ।

विजिते विजयो गोपैर्दुःखादित्यवदज्जनः ॥ १६.५९ ॥

धिगनित्यविलासस्य विभ्रमभ्रान्तिकारिणः ।

धातुरद्भुतनिर्माणविनोदविशरारुताम् ॥ १६.६० ॥

आखण्डलप्रभृतयः खाण्डवे येन खण्डिताः ।

कैराते त्रिपुरारातिः समरे येन तोषितः ॥ १६.६१ ॥

जित्वा तमपि गोपाला वराकाः सुहृदं हरेः ।

जह्रुर्विष्णुकलत्राणि धिक्कालस्य दुरन्तताम् ॥ १६.६२ ॥

रेवतीं रुक्मिणीं सत्यभामां जाम्बवतीं तथा ।

वज्रं पौत्रं च कंसारेरन्याश्च यदुयोषितः ॥ १६.६३ ॥

आदाय फल्गुणः शोचन्निन्द्रप्रस्थं समाविशत् ।

सबाष्पं पौरसंघातैरभितः परिवारितः ॥ १६.६४ ॥

राज्ये निधाय तत्रैव वज्रं याते धनंजये ।

सत्यभामानुगा देव्यः पावकं विविशुः शुचा ॥ १६.६५ ॥

व्रजन्वृष्णिवियोगार्तः किरीटि हस्तिनापुरम् ।

परावरज्ञं भावानां वने व्यासं व्यलोकयत् ॥ १६.६६ ॥

दुःखान्न्यवेदयत्तस्मै घोरं वृष्णिकुलक्षयम् ।

आत्मनश्चात्तचापस्य गोपैः पथि पराभवम् ॥ १६.६७ ॥

तमब्रवीज्ज्ञाननिधिर्मुनिराश्वास्य मूर्च्छितम् ।

पुत्र कालविलासानां सर्वमेतद्विजृम्भितम् ॥ १६.६८ ॥

मतिर्विभूतयो भोगाः प्रभावाः शक्तयो गुणाः ।

सर्वथा कालकलया नीयते स्मृतिशेषताम् ॥ १६.६९ ॥

ध्रुवं सर्वपरित्यागे न कुर्युर्मुनयो मतिम् ।

अवसानैकविरसा यदि न स्याद्भवस्थितिः ॥ १६.७० ॥

इत्युक्तो मुनिना पार्थः प्रययौ हस्तिनापुरम् ।

प्रभावं वृष्णिसिंहस्य कलयन्भृशविह्वलः ॥ १६.७१ ॥

इति श्रीक्षेमेन्द्रविरचितायां भारतमञ्जर्यां मौसलं पर्व

"https://sa.wikisource.org/w/index.php?title=भारतमञ्जरी/मौसलंपर्व&oldid=102002" इत्यस्माद् पुनः प्राप्तिः

- ३१ जनवरी २०१७ (तमे) दिनाङ्के अन्तिमसम्पादनं ०८:०१ समये अभवत्
- पाठः क्रियेटिव कॉमन्स ऐट्रिब्यूशन/शेयर-अलाइक अभिज्ञापत्रस्य अन्तर्गततया उपलब्धः अस्ति; अन्याः संस्थित्यः अपि सन्ति । अधिकं ज्ञातुम् अत्र उपयोगस्य संस्थितिं पश्यतु ।